for guidance; as in लेखप्रशस्तिः 'a form of writing'. -7 Publicity, advertising; दशाननतिरस्कारप्रशस्तिमिव Mv. 5. 12.

**प्रशस्य** *a.* (Compar. श्रेयस् or ज्यायस्, superl. श्रेष्ठ or ज्येष्ठ) Praiseworthy, commendable, excellent.

**प्रशस्वन्** *m.* The ocean.

**प्रशस्वरी** A river.

**प्रशम्** 4 P. 1 To become calm or tranquil. -2 To be soothed or appeased. -3 To stop, cease, terminate. -4 To be allayed, be quenched or extinguished; प्रशान्तं पावकास्त्रम् U. 6; निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति Pt. 3. 56. -5 To decay, wither away. *-Caus.* -1 To soothe, appease, pacify; सान्त्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत् Ms. 8. 391. -2 To allay, extinguish, quench, put down; त्वामासारप्रशमितवनोपप्लवम् Me. 17. -3 To remove, put an end to; तम् (अपचारं) अन्विष्य प्रशमयेः R. 15. 47. -4 To conquer, vanquish, subdue; पान्तु पृथ्वीं प्रशमितरिपवो धर्मनिष्ठाश्च भूपाः Mk. 10. 60. -5 To settle, adjust, compose; प्रशमयसि विवादं कल्पसे रक्षणाय Ś. 5. 8. -6 To kill, destroy. -7 To cure, heal.

**प्रशमः** 1 Calmness, tranquillity, composure; प्रशमस्थितपूर्वपार्थिवम् R. 8. 15; Ki. 2. 32. -2 Peace, rest. -3 Extinction, abatement; प्रशमादर्चिषामेतत् Ku. 2. 20. -4 Cessation, end, destruction; निर्वाणवैरदहनाः प्रशमादरीणां Ve. 1. 7; प्रयतः प्रशमं हुताशनस्य Śi. 20. 73. -5 Pacification, appeasement; प्रशमोपन्यसनं वृथा मम Śi. 16. 51.

**प्रशमन** *a.* (**-नी** *f.*) 1 Calming, tranquillizing, pacifying, removing &c. -2 Curing, healing. **-नम्** 1 Calming, tranquillizing, pacifying. -2 Allaying, assuaging, soothing, mitigating; आपन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् Me. 55. -3 Curing, healing; as in व्याधिप्रशमनम्. -4 Quenching, extinguishing, suppressing, quelling; Mb. 5. 165. 9. -5 Cessation, abatement. -6 Bestowing fitly or on fit objects; लब्धप्रशमनं कृत्वा Mb. 12. 45. 10 (com. लब्धस्य धनादेः यथोचितमंशतः पात्रे समर्पणेन शान्तिकम्) Ms. 7. 56; (सत्पात्रे प्रतिपादनम् Kull.; but others give it the next sense). -7 Securing, guarding, keeping safe; लब्धप्रशमनस्वस्थमथैनं समुपस्थिता R. 4. 14. -8 Killing, slaughter. -9 Restoration of peace; लब्धप्रशमनम् Kau. A.

**प्रशमित** *p. p.* 1 Pacified, soothed, composed, appeased, allayed. -2 Extinguished, quenched. -3 Atoned for, expiated; हा हा धिक् परगृहवासदूषणं यद् वैदेह्याः प्रशमितमद्भुतैरुपायैः U. 1. 40.

**प्रशान्त** *p. p.* 1 Calmed, tranquillized, composed; जितात्मनः प्रशान्तस्य परमात्मा समाहितः Bg. 6. 7. -2 Calm, serene, quiet, sedate, still; अहो प्रशान्तरमणीयतोद्यानस्य. -3 Tamed, subdued, quelled. -4 Ended, ceased, over; तत् सर्वमेकपद एव मम प्रशान्तम् Māl. 9. 36; प्रशान्तमस्त्रम् U. 6. 'ceased to work or withdrawn.' -5 Dead, deceased; (see शम् with प्र). -6 Allayed, removed; त्यक्त्वा भयं सर्प इव प्रशान्तः Rām. 7. 69. 39. **-Comp. -आत्मन्** *a.* composed in mind, peaceful, calm. **-ऊर्ज** *a.* weakened, enervated, prostrated. **-काम** *a.* content. **-चित्त** *a.* calm. **-चेष्ट** *a.* resting, ceased to work. **-बाध** *a.* having all obstacles or calamities removed; प्रशान्तबाधं दिशतोऽभिरक्षया Ki. 1. 18.

**प्रशान्तिः** *f.* 1 Calmness, tranquillity, composure, quiet, repose. -2 Rest, cessation, abatement. -3 Allaying, quenching, extinction.

**प्रशामः** 1 Tranquillity, calm, composure. -2 Quenching, extinction, allaying. -3 Cessation.

**प्रशाख** *a.* 1 Having many or spreading branches. -2 Being in the 5th stage of formation (said of the embryo, when the hands and feet are formed). **-खा** A small branch or twig.

**प्रशाखिका** A small branch; Mb. 8.

**प्रशास्** 2 P. 1 To teach, instruct, advise; अपि साक्षात् प्रशिष्यास्त्वं कृच्छ्रेष्विन्द्रपुरोहितम् Bk. 19. 19. -2 To order, command; प्रशाधि यन्मया कार्यम् Mārk. P. -3 To rule, govern, be lord of; यां प्रशाधि गलितावधिकालम् N. 5. 24; R. 6. 76; 9. 1. -4 To punish, chastise. -5 To pray or ask for, seek for (Atm.); इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे U. 1. 1 (used in the sense of शास् with आ q. v.).

**प्रशासकः** 1 A director, ruler. -2 A spiritual preceptor.

**प्रशासनम्** 1 Governing, ruling; एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत Bṛi. Up. 3. 8. 9. -2 Enjoining, exacting. -3 Government.

**प्रशासित्, प्रशास्तृ** *m.* 1 A king, ruler, governor; ततः सेनापतिः पश्चात् प्रशास्ता च न्यषीदत Rām. 2. 91. 40. -2 A director, adviser; बालो यत्र प्रशासिता Pt. 5. 63.

**प्रशिष्ट** *p. p.* Ruled over, governed.

**प्रशिष्टिः, प्रशिस्** *f.* Ved. Command, order.

**प्रशिथिल** *a.* 1 Very loose; प्रशिथिलमृणालैकवलयम् Ś. 3. 9. -2 Very feeble, hardly perceptible.

**प्रशिष्यः** The pupil of a pupil, the disciple of a disciple; शिष्यप्रशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधाम Śaṅkaradigvijaya.

**प्रशुद्धिः** *f.* Clearness, purity.

**प्रशून** *a.* Swollen.

**प्रशोषः** Becoming dry, drying up, aridity.

**प्रश्चो (श्च्यो) तनम्** Sprinkling, oozing; प्रश्च्योतनं नु हरिचन्दनपल्लवानाम् U. 3. 11 (v. l.).

**प्रश्नः** [प्रच्छ्-भावे नङ्] 1 A question, query; an inquiry, interrogation (अविज्ञातप्रवचनं प्रश्न इत्यभिधीयते); अनामयप्रश्नपूर्वकम् Ś. 5 'with an inquiry about (your) well-being